# Master of Arts Examination, 2023

(2nd Year, 2nd Semester)

## SANSKRIT

## Course – XVII / E

## [ Select Inscriptions of Contempoary Gupta and Post Gupta Rulers ]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

१. अधोलिखितेषु **पञ्च** प्रश्नाः सुरगिरा देवनागर्या लिप्या समाधेयाः। 1×5=5

क) द्वितीयपुलकेशिनः ऐहोल्-प्रशस्तेः कालः शकाब्देन खिस्टाब्देन च संख्यावाचकशब्दानाश्रित्य उच्यताम्। (अङ्काश्रित उल्लेखो नेष्यते)।

ख) "ख्यातजयं विजयं युधि यः समाह्वयत" - कुत्रोपलभ्यते इयमुक्तिः? "यः" इति सर्वनाम्ना क उच्यते? कोऽयं विजयः? कस्य युद्धस्य च परामर्शः?

ग) देवपालदेवस्य नालन्दाताम्रशासने तारादेवी कस्य कन्या कस्य च महिषी? तस्या उपमानरूपेण कास्तत्र उल्लिखिताः?

घ) खालिमपुरशासनेन प्रदत्तः क्रौञ्चश्वभ्रग्रामः कस्यां भुक्तौ कस्मिन् मण्डले कस्मिन् च विषये अन्तर्भवति स्म? दूतकयुवराजश्च क आसीत् तत्र?

ङ) माधाइनगरशासने दानप्रापकस्य वंशपरिचयः केन प्रकारेण उक्तः?

च) "हृष्यत्पौरस्त्यजति न दिशं दक्षिणां प्रेतभर्ता" – प्रेतभर्तुः पौरजनाः केन कारणेन हृष्यन्ति स्म ?

छ) "उमापतिधरस्य कृतिः प्रशस्तिः" – कस्येयं प्रशस्तिः ? उमापतिधरेण कथम् आत्मश्लाघा विहिता ?

२. अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः। 5×5=25

क) "मात्स्यन्यायमपोहितुं प्रकृतिभिर्लक्ष्म्याः करं ग्राहितः" – कः लक्ष्म्याः करं ग्राहितः ? तस्य पितुः पितामहस्य च नामोल्लेश्च इष्यते। अस्य श्लोकांशस्य ऐतिहासिकतात्पर्यं समासत आलोच्यताम्। .5+1+3.5

ख) "सासूयमात्मनि भवन्तमतः पितृव्यं ज्ञात्वापरुद्धचरितव्यवसाय-बुद्धौ"– कुत्रोपलभ्यते श्लोकांशोऽयम् ? "आत्मनि" इति पदेन "पितृव्यम्" इति पदेन च कयोः निर्देशः ? "अपरुद्धचरितव्यव-सायबुद्धौ" इति पदस्यार्थो व्याख्यायताम्। अपरुद्धचरितं केन प्रकारेण अनुसृतं तेन भ्रातृव्येण ? .5+1+1.5+2

ग) वंश्येषु तस्य नृपतिषु वर्षसहस्रत्रयं पदमवाप्य।
यातेषु देवभूयं क्षितीश्वरः पुष्यवर्माभूत्॥

– तस्य इति सर्वनाम्ना कस्य परामर्शः ? स कस्मिन् युगे वर्तमान आसीत् ? तस्मात् कालात् परिगण्य पुष्यवर्मणः कः काल उपलब्धः ? सा गणना श्रद्धेया न वेति सयुक्तिकं विचारणीयम्। 1+1+1+2

घ) देवपाडाभिलेखमनुसृत्य प्रद्युम्नेश्वराधिष्ठानस्य तत्र स्थापितानां देवतानां च वर्णना कार्या।



ङ) टीका कार्या–

चौरोद्धरणिकः, दौस्साधसाधनिकः, खोलः, गौल्मिकः।

च) सामन्तसेनस्य हेमन्तसेनस्य च कीर्तयो देवपाडाप्रशस्तिमाश्रित्य विशद्यन्ताम्।

छ) देवपालदेवस्य नालन्दाताम्रशासनमनुसृत्य धर्मपालस्य देवपालस्य च कीर्तयो वर्णनीयाः।